केरलपाठावलिः

# संस्कृतम्

## षष्ठी कक्ष्या
संस्कृतविद्यालयानां कृते

KERALA READER

# SANSKRIT

## Standard - VI
**For Sanskrit Schools Only**

Government of Kerala
Department of General Education

State Council of Educational Research and Training (SCERT) Kerala
**2025**

## राष्ट्रगीतम्

जनगणमन अधिनायक जय हे
भारत भाग्यविधाता।
पंजाब सिन्धु गुजरात मराठा
द्राविड उत्कल बंगा।
विन्ध्य हिमाचल यमुना गंगा
उच्छलजलधितरंगा।
तव शुभ नामे जागे
तव शुभ आशिष मागे
गाहे तव जय गाथा।
जनगण मंगलदायक जय हे
भारत भाग्यविधाता
जय हे जय हे जय हे
जय जय जय जय हे।

## प्रतिज्ञा

भारतं मम राष्ट्रम्। सर्वे भारतीयाः मे भ्रातरः। अहं मम राष्ट्रे स्निह्यामि। तस्य समृद्धायां नानाविधायां च पूर्विकसम्पत्तौ अभिमानी च भवामि। तद्योग्यतां सम्पादयितुं सदा यतिष्ये च।

अहं पितरौ गुरूंश्चादरिष्ये बहुमानयिष्ये च। विनयान्वित एवाहं सदा सर्वैः सह व्यवहरिष्ये सर्वेषु प्राणिषु दयालुर्वर्त्तिष्ये च।

मम राष्ट्राय राष्ट्रियेभ्यश्चाहं समर्पये स्व सेवाम्। राष्ट्रियाणां योगक्षेमैश्वर्येष्वेवाहम् आत्मनस्तोषं कलयामि।

**State Council of Educational Research and Training (SCERT)**
Poojappura, Thiruvananthapuram – 695 012, Kerala.
Website: www.scertkerala.gov.in
Email: scertkerala@gmail.com
Phone: 0471-2341883, Fax: 0471-231869
Type setting and Layout: SCERT
First Edition: 2025
Printed at: KBPS, Kakkanadu, Kochi – 30
Department of General Education, Government of Kerala

प्रियच्छात्र!

षष्ठकक्ष्यायाः संस्कृतपाठ्यपुस्तकं भवतां पुरतः प्रस्तूयते। ओट्टन् तुल्लल् , जीवनचरितम्, कथा, सम्भाषणम्, काव्यम्, उपन्यासः इत्येतैः व्यवहाररूपैः सम्पुष्टं भवतीदं पाठ्यपुस्तकम्।

राष्ट्रिय-कौशल-योग्यता-प्रारूपम् (NSQF) विज्ञानविनिमयोपाधयश्च (ICT) पाठ्यपुस्तकेऽस्मिन् परिगणिताः सन्ति।

स्वतन्त्रवाचनाय, स्वतन्त्रचिन्तायै, सर्गवैभवाय च पुस्तकेऽस्मिन् अवसराः समाकलिताः। भाषायाः प्रयोगोपाधिमवगन्तुं तद्वारा रचनाप्रवर्त्तनेषु भागं गृहीतुं च पठनानुभवाः कक्ष्याप्रकोष्ठात् अवाप्तव्याः।

पुस्तकस्यास्य अध्ययनेन संस्कृतस्य विशालं लोकं प्रवेष्टुं प्रेरणा नूनं भविष्यतीति आशासे।

भवदीयः
**डा. जयप्रकाश्. आर्. के.**
निर्देशकः
राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरलम्

# TEXT BOOK DEVELOPMENT COMMITTEE

SANSKRIT - ORIENTAL - STANDARD - VI

## Advisor

**Madhavan Pillai V.**, Prof & HoD of Sanskrit (Rtd.)
Govt.College for Women , Thiruvananthapuram

## Chairperson

**Dr. Asok kumar N. K.**, Associate Professor & Head
Dept. of Sanskrit Nyaya, Govt. Sanskrit College, Thiruvananthapuram.

## Experts

1) **Dr. Annapurna**, Assistant Professor of Sanskrit, Univerity College, Thiruvananthapuram.
2) **Dr. Sudheesh O. S..**, Associate Professor of Sanskrit Jyothisha, Govt. Sanskrit College, Thiruvananthapuram

## Participants

1) **Sri. Jayasankar G.**, Govt. U. P. S., Nilakkamukku, Thiruvananthapuram.
2) **Smt. Kairali N. S.**, St. Joseph U. P. S., Koovappalli, Kottayam.
3) **Smt. Leeba K. P.**, S. M. H. S. S., Kaliyar, Idukki
4) **Smt. Leelamani T. S.**, Govt. Town U.P.S., Kollam
5) **Sri. Shibulal D.**, G.U. P. S., Melila, Kottarakkara, Kollam
6) **Dr. Sudha A.**, P.S.M.G.M.U.P.S., Muttathara, Thiruvananthapuram.
7) **Sri. Sureshkumar S.**, B V U P S, Navaikkulam, Thiruvananthapuram.

## Artists

1) **Sri. Ashik L.**, G. B. H. S. S., Tirur, Malappuram
2) **Sri. Sujay Sudhakaran**, Gurulaya, Kilimanoor, Thiruvananthapuram

## Academic Co-ordinator

**Sri. Jagadeesh K. T.**, Research Officer,
SCERT, Kerala, Thiruvananthapuram.


राज्यशैक्षिकानुसन्धानप्रशिक्षण परिषद्, केरलम्
State Council of Educational Research and Training (SCERT)

# विषयानुक्रमणिका




प्रथमम् एककम् — कलाप्रपञ्चः 07

| | | | |
|---|---|---|---|
| 1 | मूषको मार्जारश्च | तुल्लल् कविता | 08-13 |
| 2 | अद्भुतबालकः | जीवनचरितम् | 14-19 |



द्वितीयम् एककम् — मानवाः वयम् 20

| | | | |
|---|---|---|---|
| 3 | उदारता मित्रजने | कथा | 21-27 |
| 4 | स्वधर्मो न विघातव्यः | सम्भाषणम् | 28-33 |



तृतीयम् एककम् — रामणीयकम् 34

| | | | |
|---|---|---|---|
| 5 | इह वत्स्यामः | काव्यम् | 35-42 |
| 6 | विस्मयकरः समुद्रः | उपन्यासः | 43-48 |

# ഭാരതത്തിന്റെ ഭരണഘടന

## ആമുഖം

ഭാരതത്തിലെ ജനങ്ങളായ നാം ഭാരതത്തെ ഒരു [1][പരമാധികാര സ്ഥിതിസമത്വ മതേതര ജനാധിപത്യ റിപ്പബ്ലിക്കായി] സംവിധാനം ചെയ്യുവാനും അതിലെ പൗരന്മാർക്കെല്ലാം:

സാമൂഹ്യവും സാമ്പത്തികവും രാഷ്ട്രീയവും ആയ നീതിയും;

ചിന്തയ്ക്കും ആശയപ്രകടനത്തിനും വിശ്വാസത്തിനും മതനിഷ്ഠയ്ക്കും ആരാധനയ്ക്കും ഉള്ള സ്വാതന്ത്ര്യവും;

പദവിയിലും അവസരത്തിലും സമത്വവും; സംപ്രാപ്തമാക്കുവാനും;

അവർക്കെല്ലാമിടയിൽ

വ്യക്തിയുടെ അന്തസ്സും [2][രാഷ്ട്രത്തിന്റെ ഐക്യവും അഖണ്ഡതയും] ഉറപ്പുവരുത്തിക്കൊണ്ട് സാഹോദര്യം പുലർത്തുവാനും;

സഗൗരവം തീരുമാനിച്ചിരിക്കയാൽ;

നമ്മുടെ ഭരണഘടനാനിർമ്മാണസഭയിൽ ഈ 1949 നവംബർ ഇരുപത്താറാം ദിവസം ഇതിനാൽ ഈ ഭരണഘടനയെ സ്വീകരിക്കുകയും നിയമമാക്കുകയും നമുക്കു തന്നെ പ്രദാനം ചെയ്യുകയും ചെയ്യുന്നു.

---

1. 1976 - ലെ ഭരണഘടന (നാല്പത്തിരണ്ടാം ഭേദഗതി) ആക്റ്റ് 2-ാം വകുപ്പു പ്രകാരം "പരമാധികാര ജനാധിപത്യ റിപ്പബ്ലിക് "എന്നതിന് പകരം ചേർത്തത് (3.1.1977 മുതൽ പ്രാബല്യം).
2. മേല്പറഞ്ഞ ആക്റ്റ് 2-ാം വകുപ്പുപ്രകാരം "രാഷ്ട്രത്തിന്റെ ഐക്യം"എന്നതിനു പകരം ചേർത്തത് (3.1.1977 മുതൽ പ്രാബല്യം).

# प्रथमम् एककम्

# कलाप्रपञ्चः



यदपि कार्यम् अनुशासनेन सौन्दर्येण च कर्तुं शक्यते, सा कला।
अस्मिन् एकके पारम्पर्यकलामेकाम् अधिकृत्य एकां तुल्लल् कवितां सुप्रसिद्धबालचित्रकारस्य जीवनचरितं च पठामः।

# प्रथमः पाठः

## मूषको मार्जारश्च





........................................ ........................................





...................................... ......................................

एताः कलाः काः इति भवन्तः जानन्ति वा ?

केरलराज्ये एतादृशानि बहूनि कलारूपाणि सन्ति। भवताम् अध्यापकस्य साहाय्येन कलारूपाणां नामानि सञ्चित्य रिक्तस्थानानि पूरयन्तु।



कुञ्चन् नम्प्यार् केरलराज्यस्य प्रसिद्धः कविः 'तुल्लल्' कलारूपस्य संस्थापकः च भवति। नम्प्यार् मलयाल-भाषायाः प्रमुखेषु हास्यकविषु अन्यतमः अस्ति। हास्येन वेष्टितं सामाजिकविमर्शनमेव तस्य कृतीनां विशेषः अस्ति। एषः पाठः तस्य 'मूषको मार्जारश्च' इति प्रसिद्धतुल्लल्ककवितायाः संस्कृतभाषायाम् अनुवादरूपः भवति।

मार्जारः किल वनभुवि रात्रौ
अन्विष्यान्नं भ्रमणं चक्रे।
तरसा गत्वा जाले पतितः
निश्चलमभवत् करपादञ्च॥
आक्रन्दितवान् आर्तो भूत्वा
भीत्या मरणे ङ्यावू ङ्यावू।
निकटे कश्चन कुहरे निवसन्
बृहदाकारो मूषकवीरः॥
शत्रोरपि तद्रुदितं श्रुत्वा
अतिभीतस्तं पीनबिडालम्।
वीक्षितवान् स तु मौनी भूत्वा
तदा बिडालो ददर्श चैनम्॥
विनयेनासौ आहूयाखुं
मामव सदयं मूषकवीर!।
अपतं जाले श्रान्तो भूतः
विफलो यन्नो मृत्युर्निकटे॥



## पदच्छेदः

| | | |
|---|---|---|
| अन्विष्यान्नम् | – | अन्विष्य + अन्नम् |
| निश्चलमभवत् | – | निश्चलम् + अभवत् |
| शत्रोरपि | – | शत्रोः + अपि |
| अतिभीतस्तम् | – | अतिभीतः + तम् |
| बिडालो ददर्श | – | बिडालः+ददर्श |
| आहूयाखुम् | – | आहूय + आखुम् |
| चासन्नम् | – | च + आसन्नम् |
| विनयेनासौ | – | विनयेन + असौ |
| स तु | – | सः + तु |
| चैनम् | – | च +एनम् । |

## विग्रहः

| | | |
|---|---|---|
| करपादम् | - | करौ च पादौ च करपादम् । |

## अमरकोशः

मार्जारः - ओतुर्बिडालो मार्जारो वृषदंशक आखुभुक् ।
(ओतुः, बिडालः, मार्जारः, वृषदंशकः, आखुभुक्)

रात्रिः - निशा निशीथिनी रात्रिस्त्रियामा क्षणदा क्षपा।
विभावरीतमस्विन्यौ रजनी यामिनी तमी ॥
(निशा, निशीथिनी, रात्रिः, त्रियामा, क्षणदा, क्षपा
विभावरी, तमस्विनी, रजनी, यामिनी, तमी)

मूषकः - उन्दुरुर्मूषकोऽप्याखुः
(उन्दुरुः, मूषकः, आखुः)

# पठनप्रवर्त्तनानि ।

## 1. पाठभागं तुल्लल् रीत्या कक्ष्यायाम् अवतारयतु ।

## 2. मञ्जूषातः उचितं पदं चित्वा लिखत-

( बिडालः, जालः, आखुः, कुहरः )



.............................................



.............................................



.............................................



.............................................

## 3. पाठभागे प्रयुक्तान्यव्ययानि सूचनामनुसृत्य वर्गीकरोतु

(अन्विष्य, गत्वा, भूत्वा, श्रुत्वा, आहूय)

| क्त्वान्तम् | ल्यबन्तम् |
|---|---|
| | |
| | |
| | |

## 4. उचितपदानि संयोज्य वाक्यानि रचयतु -

| | | |
|---|---|---|
| मार्जारः | अतिभीतः | निवसति |
| मूषकः | जाले | अभवत् |
| मार्जारः | कुहरे | पतति |
| मूषकः | श्रान्तः | अभूत् |

## 5. अधोदत्तधातुरूपाणां समानपुरुषवचनयोः लट्रूपाणि लिखत-

**यथा-** अभवत् - भवति
अकरोत् -
अपश्यत् -
**यथा-** अभवम् - भवामि
अपतम् -
अपठम् -

## 6. उचितं सर्वनामपदं चित्वा रिक्तस्थानानि पूरयत ।

( सः, तम्, तत् )

1. _______ बालः।
2. _______ पुष्पम् भवति ।
3. मूषकः _______ अपश्यत् ।

## अनुबन्धः

### अकारान्तः नपुंसकलिङ्गः वन शब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमा** | वनम् | वने | वनानि |
| **सं.प्रथमा** | हे वन ! | हे वने ! | हे वनानि ! |
| **द्वितीया** | वनम् | वने | वनानि |
| **तृतीया** | वनेन | वनाभ्यां | वनैः |

| | | | |
|---|---|---|---|
| **चतुर्थी** | वनाय | वनाभ्यां | वनेभ्यः |
| **पञ्चमी** | वनात् | वनाभ्यां | वनेभ्यः |
| **षष्ठी** | वनस्य | वनयोः | वनानाम् |
| **सप्तमी** | वने | वनयोः | वनेषु ॥ |

## कृञ् धातोः (परस्मैपदी) लङ् रूपाणि

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | अकरोत् | अकुरुताम् | अकुर्वन् |
| **मध्यमपुरुषः** | अकरोः | अकुरुतम् | अकुरुत |
| **उत्तमपुरुषः** | अकरवम् | अकुर्व | अकुर्म ॥ |

## शब्दकोशः

| पदम् | संस्कृतम् | മലയാളം | English |
|---|---|---|---|
| वनभुवि | वनभूमौ | വനഭൂമിയിൽ | In the forest |
| अन्नम् | आहारम् | ആഹാരം | Food |
| अन्विष्य | अन्वेषणं कृत्वा | അന്വേഷിച്ചിട്ട് | Having searched |
| तरसा | झटिति | പെട്ടെന്ന് | Soon |
| रोदनं | आक्रन्दनम् | കരച്ചിൽ | Cry |
| निकटे | समीपे | അടുത്ത് | Near |
| कुहरे | गुहायां | മാളത്തിൽ | In the burrow |
| पीनः | स्थूलः | തടിച്ച | Fat |
| बिडालः | मार्जारः | പൂച്ച | Cat |
| अतिभीतः | अत्यधिकं भीतः | വളരെ പേടിച്ചവൻ | He who is very much feared |
| श्रान्तः | क्षीणितः | തളർന്നവൻ | He who is tired |
| विफलः | फलं विना | ഫലമില്ലാതെ | Futile |
| मृत्युः | मरणम् | മരണം | Death |

# द्वितीयः पाठः

## अद्भुतबालकः



एतत् चित्रं दृष्टवन्तः वा?

एतत् कस्य चित्रम् ?

तादृशान् प्रमुखान् चित्रकारान् जानन्ति वा?

तेषां नामानि वदन्तु !

लोके प्रसिद्धाः बहवः चित्रकाराः सन्ति। तेषु प्रमुखाः भवन्ति तोमस् दानियल् , विन्सेन्ट् वान्गोग्, पाब्लो पिक्कासो, रबीन्द्रनाथ ठक्कुरः इत्यादयः। राजा रविवर्मा, आर्टिस्ट् नम्पूतिरिः, के.सि.एस् पणिक्कर्, राजन् कृष्णन्, शोशा जोसफ् इत्यादयः विख्याताः केरलीयाः चित्रकाराः सन्ति। चित्ररचनावैभवेन सर्वान् आकृष्टवन्तं कञ्चन बालकम् अधिकृत्य वयं पठामः।



चित्ररचनायां प्रथितयशाः बालकः आसीत् एड्मण्ड् तोमस् क्लिन्ट्। प्रतिभाधनोऽयं अनेकानि चित्राणि अल्पेनैव कालेन अरचयत् । 2522 दिनैः पञ्चसहस्राधिकानि चित्राणि तेन रचितानि दृश्यन्ते । वर्णवैविध्यानां तथा रेखाणां सूक्ष्मतया च विविधानाम् आशयानां चित्रीकरणेन च सः सर्वान् आकर्षति स्म। एम्.टि. जोसफ् चिन्नम्मादम्पत्योः पुत्रः अयं 1976 तमे वर्षे मेय् - मासस्य 19 तमे दिनाङ्के केरलराज्ये कोच्चीनगरे जन्म प्राप्तवान् ।

बाल्य एव श्रुताः कथाः तस्य भावनां परिपोषयन्ति स्म । लघुलघुप्रस्तरान् स्वीकृत्य तत्र तत्र विस्मयकराणि चित्राणि निर्मातुं सः यत्नं कृतवान् । बालोऽयं क्रयोण्, जलीयवर्णकानि,

तैलवर्णकानि इत्यादीनि वस्तूनि उपयुज्य जनान्  आनन्दयति स्म । काकः, कोकिलः, उलूकः, मूषकः इत्यादीनां मनोरञ्जकानि चित्राणि सर्वेषां नयनविस्मयं जनयन्ति। तस्य गृहस्य समीपस्थानां मन्दिराणाम् उत्सवदृश्यानि वर्णवैचित्र्येण तेन रचितानि। अपि च परितो दृश्यमानं सर्वमपि वस्तुजातं स्वीकृत्य सजीवचित्राणि विरचय्य लोकाय समर्पितवान्। प्रतिभाशाली अयं 1983 तमे वर्षे एप्रिल् मासस्य 15 दिनाङ्के कालयवनिकायाः अन्तः प्राविशत्।

अद्भुतबालस्यास्य प्रतिभां प्रदर्शयितुम् तम् आदर्तुं च अद्यापि सर्वकारः तस्य चित्राणां प्रदर्शनानि बहुत्र आयोजयति।

## पदच्छेदः

| | | |
|---|---|---|
| अद्भुतबालस्यास्य | - | अद्भुतबालस्य +अस्य |
| प्रतिभाधनोऽयं | - | प्रतिभाधनः +अयम् |
| अल्पेनैव | - | अल्पेन+ एव |
| बाल्य एव | - | बाल्ये + एव |
| बालोऽयम् | - | बालः+ अयम् |
| सर्वमपि | - | सर्वम् +अपि |

## विग्रहः

| | | |
|---|---|---|
| दम्पती | - | जाया च पतिः च दम्पती। |
| मनोरञ्जकम् | - | मनसः रञ्जकं मनोरञ्जकम्। |
| नयनविस्मयम् | - | नयनयोः विस्मयः नयनविस्मयः, तं नयनविस्मयम्। |
| प्रतिभाशाली | - | प्रतिभया शालते तच्छीलःप्रतिभाशाली। |

## अमरकोशः

| | |
|---|---|
| **प्रस्तरः** | पाषाणप्रस्तरग्रावोपलाश्मानः शिला दृषत्। |
| | (पाषाणः, प्रस्तरः, ग्रावा, उपलः, अश्मः, शिला, दृषत्) |
| **नयनम्** | लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी। दृग्दृष्टी ॥ |
| | (लोचनम्, नयनम्, नेत्रम्, ईक्षणम्, चक्षुः, अक्षिणी, दृक्, दृष्टिः) |

# पठनप्रवर्तनानि ।

## 1. शब्दकोशानुसारं समानपदं चित्वा लिखतु ।

प्रस्तरः -

प्रथितयशाः -

परितः -

## 2. सूचनानुसारं सङ्ख्याम् अक्षरैः लिखतु ।

| सङ्ख्या | सहस्रम् | | शतम् | | शतोनाः संख्याः |
|---|---|---|---|---|---|
| 1984 | सहस्रम् | अधिक | नव | उत्तर | चतुरशीतिः |

**चतुरशीत्युत्तर - नवशताधिक - सहस्रम् ।**

1976 - षट्सप्तत्युत्तरनवशताधिकसहस्रम् ।

1977 -

1978 -

1980 -

1983 -

## 3. चित्रसाहाय्येन चित्रकारमधिकृत्य एकां लघुटिप्पणीं लिखतु ।



**चित्रकारो नम्पूतिरिः**

करुवाट्टुमन वासुदेवन् नम्पूतिरिः ।

परमेश्वरन् नम्पूतिरि -श्रीदेवी अन्तर्जनयोर्दम्पत्योः पुत्रः

जन्म ई. 1925 सप्तम्बर् मासस्य 13 दिनाङ्के ।

मृतिः ई.2023 जूलै मासस्य 7 दिनाङ्के ।

चित्रकारः शिल्पी च । उत्तमस्य कलानिदेशकस्य कृते केरलराज्यस्य चलनचित्रपुरस्कारः- राजारविवर्मापुरस्कारः- बालसाहित्यस्य कृते पुरस्कारः, हास्यचित्राणां कृते प्रथितः।

### 4. कोष्ठकात् उचितनामानि स्वीकृत्य चित्रस्य अधः स्थापयतु ।

(राजा रविवर्मा, रवीन्द्रनाथ ठक्कुरः, पाब्लो पिक्कासो, शोशा जोसफ्)



..............................



..............................



..............................



..............................

## अनुबन्धः

### व्याकरणविशेषः

#### स्मशब्दयोगे लटः भूतकालार्थः ।

वर्तमानकालक्रियापदेन सह स्म शब्दप्रयोगे भूतकालार्थः सिद्ध्यति ।

लिखति स्म - अलिखत् ।

क्रीडति स्म - अक्रीडत् ।

वसति स्म - अवसत् ।

रचयति स्म - अरचयत् ।

### ऋकारान्तः पुंल्लिङ्गः 'पितृ' शब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | पिता | पितरौ | पितरः |
| सं.प्रथमा | हे पितः! | हे पितरौ ! | हे पितरः ! |
| द्वितीया | पितरम् | पितरौ | पितॄन् |
| तृतीया | पित्रा | पितृभ्याम् | पितृभिः |
| चतुर्थी | पित्रे | पितृभ्याम् | पितृभ्यः |
| पञ्चमी | पितुः | पितृभ्याम् | पितृभ्यः |
| षष्ठी | पितुः | पित्रोः | पितॄणाम् |
| सप्तमी | पितरि | पित्रोः | पितृषु ॥ |

### दृश् धातोः (कर्मणि) लट् रूपाणि

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | दृश्यते | दृश्येते | दृश्यन्ते |
| मध्यमपुरुषः | दृश्यसे | दृश्येथे | दृश्यध्वे |
| उत्तमपुरुषः | दृश्ये | दृश्यावहे | दृश्यामहे ॥ |

## शब्दकोशः

| पदम् | संस्कृतम् | മലയാളം | English |
|---|---|---|---|
| प्रथितयशाः | प्रशस्तः | പ്രശസ്തനായ | He who is famous |
| अनेकानि | बहूनि | ധാരാളം | Many |
| अरचयत् | चित्रणं कृतवान् | ചിത്രീകരിച്ചു | Painted |
| आकर्षति स्म | वशीकरोति स्म | ആകർഷിച്ചു | Attracted |
| प्रस्तरान् | शिलाखण्डान् | കല്ലുകൾ | Stones |
| मनोरञ्जकः | तोषकः | സന്തോഷിപ്പിക്കുന്ന | Which makes happy |
| अपि च | अधिकतया | മാത്രമല്ല | Moreover |
| परितः | अभितः | ചുറ്റും | Around |
| विरचय्य | रचयित्वा | രചിച്ചിട്ട് | Having drawn |
| बहुत्र | अनेकस्थानेषु | പലയിടങ്ങളിൽ | In many places |

# द्वितीयम् एककम्

## मानवाः वयम्

मनुजः सामूहिकजीवी भवति। तस्य चिन्ताशक्तिः तथा स्फुटं भाषणशक्तिः च तं अन्यस्मात् विभिन्नं करोति । स्नेहः, सौहृदम्, दया, अनुकम्पा इत्यादीनि जीवने मूल्यानि । मूल्यरहितं जीवनं कीदृशं स्यात् ? बाल्यादारभ्य सद्गुणानां पोषणं करणीयमेव । एककेऽस्मिन् मैत्रीविषयिणी कथा, दयाभावसूचकं सम्भाषणं च अन्तर्भवति ।



# तृतीयः पाठः

# उदारता मित्रजने





चित्रे के के सन्ति ?

एतां कथां जानन्ति वा ?

अस्याः कथायाः सन्देशः कः ?

मैत्रीविषये अन्यां कथां पठामः वा?

अस्माकं परा सम्पद् भवति उत्तममैत्री। अस्माभिरेव तस्याः चयनं करणीयम्।
प्रतिकूलसमयेऽपि यः अस्माभिः सह वर्तते स एव सन्मित्रम्।
अत्र मैत्रीम् अधिकृत्य काञ्चित् कथां पठामः।



प्रभाते एव सर्वे छात्राः कक्ष्यायाम् आगच्छन्। सर्वे मिलित्वा गृहपाठस्य चर्चाम् अकुर्वन्। तस्मिन्नवसरे प्रणवः मातुलेन उपहाररूपेण दत्तां सुन्दरीं लेखनीं मित्रेभ्यः प्रादर्शयत्। सुहृदः "उत्तमा लेखनी" इति अवदन्। किन्तु प्रणवस्य प्रियमित्रस्य नीरजस्य मनसि तां लेखनीं कथञ्चित् प्राप्तुम् इच्छा जाता।

किञ्चित्समयानन्तरं प्रणवः कक्ष्यातः बहिर्गतः। तदा नीरजः अन्यैरदृष्ट्वा तां लेखनीम् आदाय स्वस्य स्यूते अस्थापयत्। कक्ष्यां आगतः प्रणवः लेखनीम् अन्विष्टवान्। परन्तु न लब्धा। प्रणवः विषयमिमं गुरुम् अवदत्। गुरुस्तु छात्रान् पृच्छतु, सर्वत्र अवलोकयतु इति प्रणवं निरदिशत्। सः तथा अकरोत्। किन्तु सः नीरजं न पृष्टवान्। यतः स्वमित्रे कदापि तस्य अविश्वासः न आसीत्।

प्रणवस्य विश्वासं दृष्ट्वा नीरजः दुःखितः अभवत्। सः प्रणवस्य समीपम् आगत्य सर्वमपि वृत्तान्तं न्यवेदयत् क्षमापणमकरोत् च। प्रणवः तम् आश्लिष्य एवमवदत् "मित्राणि चेत् परस्परं दोषाः निवारणीयाः खलु"।

इयं लेखनी भवतः इष्टतमा इति जानामि। अतः त्वमेव तां स्वीकुरु इत्युक्त्वा प्रणवः नीरजस्य हस्ते लेखनीं सस्नेहं समर्पितवान्। ततः प्रभृति नीरजः जीवने कदापि तादृशीं प्रवृत्तिं न अकरोत्।

### पदच्छेदः

| | | |
|---|---|---|
| अन्यैरदृष्ट्वा | - | अन्यैः +अदृष्ट्वा |
| तस्मिन्नवसरे | - | तस्मिन् +अवसरे |
| विषयमिमम् | - | विषयम् +इमम् |
| कदापि | - | कदा +अपि |
| किञ्चित्समयानन्तरम् | - | किञ्चित् +समयानन्तरम् |
| क्षमापणमकरोत् | - | क्षमापणं +अकरोत् |
| सर्वमपि | - | सर्वम् +अपि |
| एवमवदत् | - | एवम् +अवदत् |
| त्वमेव | - | त्वम् +एव |
| इत्युक्त्वा | - | इति +उक्त्वा |

### विग्रहः

| | | |
|---|---|---|
| सस्नेहम् | - | स्नेहेन सह। |
| सामोदम् | - | मोदेन सह । |
| स्वमित्रेषु | - | स्वस्य मित्रं स्वमित्रं तेषु स्वमित्रेषु। |
| स्वभवनेषु | - | स्वस्य भवनं स्वभवनं तेषु स्वभवनेषु। |

### अमरकोशः

**छात्रः** - छात्रान्तेवासिनौ शिष्ये ।

( छात्रः, अन्तेवासी )

## पठनप्रवर्तनानि

### 1. कोष्ठकात् उचितम् अव्ययपदं चित्वा पट्टिकां पूरयतु।

(मिलित्वा, प्राप्तुम्, आदाय, नेतुम्, दृष्ट्वा, आगत्य, आश्लिष्य, उक्त्वा, पातुम्)

| क्त्वान्तम् | ल्यबन्तम् | तुमुन्नन्तम् |
|---|---|---|
| मिलित्वा | आदाय | प्राप्तुम् |
| | | |
| | | |

## 2. उचितम् अव्ययपदं कोष्टकात् चित्वा वाक्यानि उदाहरणानुसारं लिखतु ।

(गत्वा,परिपाल्य, मिलित्वा, आश्लिष्य, क्रेतुं, प्रक्षाल्य, दृष्ट्वा, प्रविश्य)

1. बालः विद्यालयं **गच्छति** । बालः पाठं पठति ।
   बालः विद्यालयं गत्वा पाठं पठति ।
2. गुरुः शिष्यम् **आश्लिष्यति** । गुरुः शिष्यम् अभिनन्दति ।
   ............................................................ ।
3. गायिका वेदिकां **प्रविशति** । गायिका गायति ।
   ............................................................ ।
4. अरुणः वस्त्रं **प्रक्षालयति** । अरुणः वस्त्रं प्रसारयति ।
   ............................................................ ।
5. सैनिकः राज्यं **परिपालयति** । सैनिकः सेवां करोति ।
   ............................................................ ।
6. महिला शाकान् **क्रीणाति** । महिला विपणिं गच्छति ।
   ........................................................... ।

## 3. रेखाङ्कितशब्दानां लङ् रूपाणि उपयुज्य वाक्यं पूरयतु ।

माता पायसं **पचति** ।

माता पायसम् अपचत् ।

शिशुः क्षीरं **पिबति** ।

शिशुः क्षीरम् ......... ।

बालः पाठं **लिखति** ।

बालः पाठं .......... ।

अश्वः शीघ्रं **धावति** ।

अश्वः शीघ्रं .........।

## 4. यथोचितं योजयतु

| | | |
|---|---|---|
| उदा : - | पठति | अपचत् |
| | करोति | अपिबत् |
| | पिबति | अपठत् |
| | लिखति | अकरोत् |
| | पचति | अलिखत् । |

**5. टिप्पणीः लिखतु।**

प्रियच्छात्राः! भवन्तः उपहारान् प्राप्तवन्तः खलु?

कीदृशाः उपहाराः लब्धाः ?

तेषु इष्टतमः केन दत्तः ?

तस्य कारणं किम् ?

उपहारम् अधिकृत्य पञ्च वाक्यानि लिखतु।

**6. सौहृदम् इत्याशययुक्ताम् एकां कथां रचयतु।**

**7. उत्तममित्राणां गुणाः के इति कोष्ठकात् चित्वा पत्रे लिखतु।**

(स्नेहः, द्वेषः, अनुकम्पा, अहङ्कारः, उदारता, कापट्यम्, समदर्शनम्)



## 8. पादटिप्पणीं लिखतु ।

(भिक्षां ददाति, मातामह्यै मार्गं उल्लङ्घयितुं साहाय्यं करोति, प्राथमिकचिकित्सां ददाति, सहजीविषु उदारता, जनान् जलप्लवात् रक्षन्ति।)





.............................................. ..............................................





.............................................. ..............................................

## अनुबन्धः

### ईकारान्तः स्त्रीलिङ्गः लेखनी शब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | लेखनी | लेखन्यौ | लेखन्यः |
| सं.प्रथमा | हे लेखनि ! | हे लेखन्यौ ! | हे लेखन्यः ! |
| द्वितीया | लेखनीं | लेखन्यौ | लेखनीः |
| तृतीया | लेखन्या | लेखनीभ्याम् | लेखनीभिः |
| चतुर्थी | लेखन्यै | लेखनीभ्याम् | लेखनीभ्यः |
| पञ्चमी | लेखन्याः | लेखनीभ्याम् | लेखनीभ्यः |
| षष्ठी | लेखन्याः | लेखन्योः | लेखनीनाम् |
| सप्तमी | लेखन्यां | लेखन्योः | लेखनीषु ॥ |

## कृञ् धातोः (परस्मैपदी) लङ् रूपाणि

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अकरोत् | अकुरुताम् | अकुर्वन् |
| मध्यमपुरुषः | अकरोः | अकुरुतम् | अकुरुत |
| उत्तमपुरुषः | अकरवम् | अकुर्व | अकुर्म ॥ |

## शब्दकोशः

| पदम् | संस्कृतम् | മലയാളം | English |
|---|---|---|---|
| लेखनी | तूलिका | പേന | Pen |
| मित्रम् | सुहृद् | സുഹൃത്ത് | Friend |
| मातुलः | मातुः भ्राता | അമ്മാവൻ | Maternal uncle |
| इच्छा | काङ्क्षा | ആഗ്രഹം | Desire |
| आदाय | स्वीकृत्य | എടുത്തിട്ട് | Having received |
| स्यूतः | प्रसेवः | സഞ്ചി | Bag |
| अपराधः | दोषः | ദോഷം | Fault |
| वृत्तान्तः | वार्ता | വാർത്ത | News |
| प्रभृति | आरभ्य | തുടങ്ങിയിട്ട് | Having started from |

सौहृदम्, दया, आर्द्रता इत्यादयः गुणाः न केवलं मनुष्येषु,
अपि तु सहजीविषु अपि भवेयुः इति धर्मः।

## चतुर्थः पाठः

# स्वधर्मो न विघातव्यः



चित्रे बालकः किं करोति ?

भवन्तः एतादृशानि कर्माणि कुर्वन्ति वा ?

मानवजीवने आर्जनीयानि अनेकानि मूल्यानि सन्ति। तेषु दया, स्नेहः, आर्द्रता, अनुकम्पा , इत्यादयः प्रमुखाः भवन्ति। सहजीविनां कृते सुमनसः त्यागसन्नद्धाः वर्तन्ते। तादृशं एकं सम्भाषणं श्रृणुमः।



| | |
|---|---|
| पौत्रः | मातामहि! एकां कथां वदतु। |
| मातामही | अद्यतनपठनं समाप्तं वा ? |
| पौत्रः | आम् पठितम्। सर्वं पठितम्। विना विलम्बं शीघ्रं कथयतु। |
| मातामही | भवतु, एकां कथां श्रावयामि। |
| पौत्रः | वदतु, कथाश्रवणे अतीव इच्छा अस्ति। |
| मातामही | एकदा गुरुशिष्यौ एकां यात्राम् अकुरुताम्। मार्गमध्ये तौ कस्मिंश्चित् तटाके कञ्चन जीविनम् अपश्यताम्। |
| पौत्रः | सः कः ? श्रोतुम् उत्सुकोऽस्मि। |
| मातामही | तस्मिन् जले प्राणरक्षार्थं श्रमं कुर्वन्तं कञ्चन वृश्चिकम् अपश्यताम्। तदा तं रक्षितुं सः गुरुः श्रममकरोत्। |
| पौत्रः | मातामहि! तदानीं वृश्चिकः दशति किल? ततः किम् ? |
| मातामही | आम् सः पुच्छाग्रेण अदशत्। तद् दृष्ट्वा शिष्यः गुरुमपृच्छत्। |
| पौत्रः | (औत्सुक्येन) किमपृच्छत् ? |

| | |
|---|---|
| मातामही | तेन दष्टेनापि भवता सः वृश्चिकः कुतः न मारितः इति। |
| पौत्रः | सत्यमेव। किमर्थं स गुरुः तं वृश्चिकं रक्षितवान् ? |
| मातामही | श्रृणु तावद्गुरोः प्रतिवचनम्। |
| पौत्रः | वद ! वद ! |
| मातामही | दंशनं तस्य स्वभाव एव। परन्तु रक्षणम् अस्माकं धर्मश्च। सहजीविस्नेहः भूतानुकम्पा भूतसंरक्षणं च अस्माकं कर्तव्यानि। एवं गुरुः शिष्यम् उदबोधयत्। |

## पदच्छेदः

| | | |
|---|---|---|
| उत्सुकोस्मि | - | उत्सुकः+ अस्मि |
| श्रममकरोत् | - | श्रमम्+ अकरोत् |
| धर्मश्च | - | धर्मः+ च |
| सत्यमेव | - | सत्यम् +एव |
| गुरुमपृच्छत् | - | गुरुम् + अपृच्छत् |
| किमपृच्छत् | - | किम् +अपृच्छत् |
| दष्टेनापि | - | दष्टेन +अपि। |

## विग्रहः

| | | |
|---|---|---|
| पौत्रः | - | पुत्रस्य अपत्यं पुमान् |
| सहजीविस्नेहः | - | सहजीविषु स्नेहः |
| भूतानुकम्पा | - | भूतेषु अनुकम्पा |
| मार्गमध्ये | - | मार्गस्य मध्ये |
| प्राणरक्षा | - | प्राणस्य रक्षा |
| पुच्छाग्रम् | - | पुच्छस्य अग्रम् |
| औत्सुक्येन | - | उत्सुकस्य भावः औत्सुक्यं, तेन |

## अमरकोशः

**गुरुः**

उपाध्यायोऽध्यापकोऽथ स्यान्निषेकादिकृद्गुरुः।
मन्त्रव्याख्याकृदाचार्य आदेष्टा त्वध्वरे व्रती॥

**वृश्चिकः**

वृश्चिकः शूककीटः स्यादलिद्रुणौ तु वृश्चिके।

# पठनप्रवर्तनानि

## 1. कोष्ठकात् क्रियापदानि चित्वा पट्टिकां पूरयतु ।

| | | |
|---|---|---|
| गच्छति | अपृच्छत् | पश्यतु |
| अपश्यत् | पृच्छतु | लिखति |
| लिखतु | अगच्छत् | गच्छतु |
| पृच्छति | अलिखत् | पश्यति |

| | **लट्** | **लङ्** | **लोट्** |
|---|---|---|---|
| **उदा-** | पठति | अपठत् | पठतु |

.................

## 2.कोष्ठकात् प्रश्नवाचकशब्दान् चित्वा संभाषणशकलं पूरयतु ।

( कुत्र, कः, कुतः, किमर्थम्, किम्)

बालः - अम्ब क्षीरं ददातु ।

अम्बा - .................... एतावत् त्वरा ।

बालः - मम बुभुक्षा अधिका एव ।

अम्बा - अस्तु ददामि ।

बालः - अस्माकं बिडालः कुत्र ?

अम्बा - सः तत्र प्रकोष्ठे अस्ति ।

बालः - तस्मै क्षीरं दत्तं वा ?

अम्बा - आम् दत्तमस्ति ।

बालः - पिता ........... ?

अम्बा - सः आपणम् गतवान् ।

बालः - .......... आपणं गतवान् ।

अम्बा - भोज्यानि क्रेतुं गतवान् ।

बालः - ............... विशेषः?

अम्बा - अतिथयः आगच्छन्ति, अत एव ।

बालः - अतिथयः............ आगच्छन्ति ?

अम्बा - मम देशात् ।

### 3. उचितपदेन रिक्तस्थानं पूरयतु-

अध्यापकः ................ लिखति (सुधाखण्डः)

बालकाः ................... क्रीडन्ति (कन्दुकः)

कृषकः ................ कर्षति ( हलः)

माता ................ आह्वयति (हस्तः)

चित्रकारः ......... चित्रं रचयति (कूर्चः)

### 4. कोष्ठकात् उचितम् अव्ययपदं स्वीकृत्य पूरयतु-

(विना, वा, एव, च, किल)

बालकाः लेखन्या .......... लिखन्ति।

सः रमेशः नास्ति राजेशः ............।

अध्यक्षेण .......... सभा न शोभते।

भवतः गृहं विद्यालयस्य समीपं .........?

सर्वं कुशलं ..................?

## अनुबन्धः

### उकारान्तः पुल्लिङ्गः गुरु शब्दः

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमा** | गुरुः | गुरू | गुरवः |
| **सं.प्रथमा** | हे गुरो ! | हे गुरू ! | हे गुरवः! |
| **द्वितीया** | गुरुम् | गुरू | गुरून् |
| **तृतीया** | गुरुणा | गुरुभ्याम् | गुरुभिः |
| **चतुर्थी** | गुरवे | गुरुभ्याम् | गुरुभ्यः |
| **पञ्चमी** | गुरोः | गुरुभ्याम् | गुरुभ्यः |
| **षष्ठी** | गुरोः | गुर्वोः | गुरूणाम् |
| **सप्तमी** | गुरौ | गुर्वोः | गुरुषु ॥ |

## भू धातोः (परस्मैपदी) लोट् रूपाणि

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | भवतु /भवतात् | भवताम् | भवन्तु |
| मध्यमपुरुषः | भव /भवतात् | भवतम् | भवत |
| उत्तमपुरुषः | भवानि | भवाव | भवाम |

## शब्दकोशः

| पदम् | संस्कृतम् | മലയാളം | English |
|---|---|---|---|
| स्वधर्मः | आत्मनः धर्मः | സ്വന്തം കർത്തവ്യം | Own duty |
| पौत्रः | पुत्रस्य पुत्रः | പൌത്രൻ | Grandson |
| शीघ्रं | सद्यः /झटिति | പെട്ടന്ന് | Suddenly |
| तटाकः | सरः | തടാകം | Lake |
| उत्सुकः | तत्परः | താൽപര്യമുള്ളയാൾ | One who is interested |
| परिश्रमन्तं | प्रयत्नशीलं | പ്രയത്നശീലനായ | He who is hardworking |
| दंशति | दशति | കടിക്കുന്നു | Bites |
| पुच्छम् | लाङ्गूलम् | വാൽ | Tail |
| वृश्चिकः | शूककीटः | തേൾ | Scorpion |
| भूतानुकम्पा | दया | കാരുണ്യം | Kindness |
| उदबोधयत् | अज्ञापयत् | ബോധിപ്പിച്ചു | Sensitised |

# तृतीयम् एककम्
# रामणीयकम्



बहुविधैः जीवजालैः सम्पन्ना प्रकृतिः सर्वेषां हृदयहारिणी भवति। प्रकृत्या सह जीवनं आनन्ददायकं भवति। प्रकृतेः सौन्दर्यं सम्पूर्णतया द्रष्टव्यं चेत् वनं गन्तव्यम्। प्रकृतिरेव प्राणवायुं जलं भक्षणपदार्थान् च अस्मभ्यं प्रदाय माता इव अस्मान् परिपालयति। प्रकृतेः सौन्दर्यं कवीनां सर्गभावनां प्रचोदयति। महाकवयः ऋषयः च प्रकृतेः मनोहारितां वर्णयित्वा तत् सौन्दर्यं संरक्षणीयम् इति अस्मान् बोधयन्ति।

अस्मिन् एकके आदिकवेः वाल्मीकेः रामायणकाव्यात् उद्धृतः "इह वत्स्यामः" इति भागः, विस्मयकरः समुद्रः इति उपन्यासश्च अन्तर्भवति।

# पञ्चमः पाठः

# इह वत्स्यामः




चित्रे किं किं पश्यन्ति ?

विविधानि पुष्पाणि, लघुलघुशलभाः, लघुलघुजीविनः, लघुसस्यानि इत्यादीनि।

उद्यानस्य उपवनम् इति अपरं नाम अप्यस्ति। वने बृहद्वृक्षाः जन्तवः पर्वताः नद्यः च सन्ति। तादृशं किञ्चन वनदृश्यं वयं पश्यामः।

विश्वोत्तरम् इतिहासकाव्यं भवति रामायणम् । आदिकविना वाल्मीकिना विरचिते अस्मिन् काव्ये सप्त काण्डानि सन्ति । तत्रस्थात् आरण्यकाण्डात् स्वीकृतं पञ्चवटीवर्णनम् अस्ति पाठोऽयम्। वनवासार्थं पञ्चवटीम् आगतः सीतालक्ष्मणसमेतो रामः पर्णशालानिर्माणाय योग्योऽयं प्रदेशः इति लक्ष्मणं वदति।



**१ . अयं देशः समः श्रीमान्**
**पुष्पितैस्तरुभिर्वृतः ।**
**इहाश्रमपदं सौम्य !**
**यथावत्कर्तुमर्हसि ॥**

**पदच्छेदः -**

| | | |
|---|---|---|
| पुष्पितैस्तरुभिः | - | पुष्पितैः+ तरुभिः। |
| तरुभिर्वृत: | - | तरुभिः + वृतः । |
| इहाश्रमपदं | - | इह + आश्रमपदम् । |
| यथावत्कर्तुमर्हसि | - | यथावत् + कर्तुम् + अर्हसि । |

**अन्वयः** **अर्थः**

| | | |
|---|---|---|
| सौम्य ! | - | हे वत्स! |
| अयं देश: | - | पञ्चवटीप्रदेश : |
| समः | - | समतलः (निम्नोन्नतिरहितः ) |
| पुष्पितैः तरुभिः | - | फुल्लपुष्पैः वृक्षैः आवृतः (अस्ति) |
| वृतः | - | परिवृतः |

| | | |
|---|---|---|
| श्रीमान् | - | ऐश्वर्यपूर्णः (भवति) |
| इह | - | अत्र |
| यथावत् | - | यथायोग्यम् |
| आश्रमपदं | - | आश्रमस्य स्थानम् (निषित्य) |
| कर्तुमर्हसि | - | निर्माणं कुरु। |

**अन्वयः**

हे सौम्य! अयं देशः पुष्पितैः तरुभिः वृतः श्रीमान् (च भवति), इह यथावत् आश्रमपदं कर्तुमर्हसि ।

**आशयः**

पञ्चवटीं गत्वा श्रीरामः लक्ष्मणम् उवाच - " हे सौम्य ! समः पुष्पितैः तरुभिः वृतः श्रीमान् च भवति अयं पञ्चवटीदेशः । अतः इह आश्रमस्य यथायोग्यं निर्माणं कुरु" इति ।

२. **इयमादित्यसङ्काशैः**
**पद्मैः सुरभिगन्धिभिः ।**
**अदूरे दृश्यते रम्या**
**पद्मिनी पद्मशोभिता ॥**

**पदच्छेदः-**

इयमादित्यसङ्काशैः - इयम् +आदित्यसङ्काशैः

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| इयम् | - | एषा |
| पद्मशोभिता | - | कमलैः शोभिता |
| पद्मिनी | - | नलिनी |
| आदित्यसङ्काशैः | - | सूर्यसमानैः |
| सुरभिगन्धिभिः | - | सुगन्धविशिष्टैः |
| पद्मैः | - | कमलैः |
| रम्या | - | रमणीया |
| अदूरे | - | समीपे |
| दृश्यते | - | ईक्ष्यते । |

**अन्वयः**

इयं पद्मशोभिता पद्मिनी आदित्यसङ्काशैः सुरभिगन्धिभिः पद्मैः रम्या अदूरे दृश्यते।

**आशयः**

पञ्चवटीं प्रविश्य तत्रस्थं प्रकृतिसौन्दर्यं दृष्ट्वा श्रीरामः अनुजं लक्ष्मणम् अवदत् " हे वत्स ! इयं सूर्यसन्निभैः सुरभिभिः कमलैः मनोहरा पुष्करिणी समीपे दृश्यते। अतः इह आश्रमं कर्तुं अर्हसि।

**विग्रहः**

| | |
|---|---|
| आदित्यसङ्काशैः | - आदित्येन सदृशैः |
| सुरभिगन्धिभिः | - सुरभिः गन्धः यस्य तत् सुरभिगन्धि तैः सुरभिगन्धिभिः। |
| अदूरे | - न दूरे |
| पद्मशोभिता | - पद्मैः शोभिता |

**क्रियापदपरिचयः**

दृश्यते -'दृश्' धातोः (परस्मैपदी) लट् (कर्मणि) प्रथमपुरुष - एकवचनम्

३ **मयूरनादिता रम्याः**
**प्रांशवो बहुकन्दराः।**
**दृश्यन्ते गिरयः सौम्य**
**फुल्लैस्तरुभिरावृताः॥**

**पदच्छेदः-**

| | | |
|---|---|---|
| प्रांशवो बहुकन्दराः | - | प्रांशवः+ बहुकन्दराः |
| फुल्लैस्तरुभिरावृता | - | फुल्लैः +तरुभिः +आवृताः |
| मयूरनादिता रम्याः | - | मयूरनादिताः +रम्याः। |

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| हे सौम्य! | - | हे सौम्यशीला ! (लक्ष्मण !) |
| मयूरनादिताः | - | मयूराणां रवैः मुखरिताः |
| फुल्लैः | - | विकसितैः |
| तरुभिः | - | वृक्षैः |

| | | |
|---|---|---|
| आवृताः | - | आच्छादिताः |
| प्रांशवः | - | उन्नताः |
| बहुकन्दराः | – | बहुभिः गुहाभिः युक्ताः |
| रम्याः | - | सुन्दराः |
| गिरयः | - | पर्वताः |
| दृश्यन्ते | – | ईक्ष्यन्ते। |

**अन्वयः**

हे सौम्य ! मयूरनादिताः फुल्लैः तरुभिः आवृताः प्रांशवः बहुकन्दराः रम्याः गिरयः दृश्यन्ते।

**आशयः**

हे लक्ष्मण, मयूरशब्दविशिष्टाः , विकसितपुष्पैः तरुभिः आवृताः अत्युन्नताः अनेकविधगुहाविशिष्टाः अतः एव रम्याः पर्वताः दृश्यन्ते।

**विग्रहः-**

मयूरनादिताः - मयूरैः नादिताः।

४ **इदं पुण्यमिदं रम्यम्**
**इदं बहुमृगद्विजम्।**
**इह वत्स्याम सौमित्रे**
**सार्धमेतेन पक्षिणा॥**

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| हे सौमित्रे! | - | हे लक्ष्मण ! |
| इदम् | - | एतत् |
| पुण्यम् | - | पवित्रम् |
| रम्यम् | - | रमणीयम् |
| बहुमृगद्विजम् | - | बहुभिः मृगैः पक्षिभिश्च सम्पन्नम् |
| एतेन | - | अनेन |
| पक्षिणा | - | विहगेन (जटायुषा) |
| सार्धम् | - | सह |
| इह | - | अत्र |
| वत्स्यामः | - | वासं करिष्यामः। |

**अन्वय:**

हे सौमित्रे! इदं पुण्यं इदं रम्यं इदं बहुमृगद्विजम् एतेन पक्षिणा सार्धम् इह वत्स्याम:।

**आशय:**

पञ्चवटीप्रदेशस्य रमणीयतां दृष्ट्वा श्रीराम: अनुजं लक्ष्मणम् अवदत्- " सौमित्रे ! इदं पवित्रं रम्यं बहुभि: मृगै: पक्षिभिश्च युक्तं च अत: एतेन पक्षिणा (रामलक्ष्मणाभ्यां सह आगतेन जटायुषा ) सार्धम् इह (पञ्चवट्याम्) वत्स्याम:।

**विग्रह: -**

सौमित्रे! - सुमित्राया: अपत्यं पुमान् सौमित्रि:, तस्य संबुद्धौ सौमित्रे ! ।

**क्रियापदपरिचय:**

वत्स्याम: –'वस्' धातो: ( परस्मैपदी) लृट् उत्तमपुरुष बहुवचनम् ।

## पठनप्रवर्तनानि

**1. मातृभाषायां विद्यमाना: समानाशययुक्ता: कविता: सञ्चित्य सम्पुटं रचयतु, कक्ष्यायाम् अवतारयतु ।**

**2. श्लोकं सतालमालपतु। श्लोकस्य आशयं टिप्पणीपुस्तके लिखतु ।**

**3. उदाहरणानुसारम् उचितपदानि स्वीकृत्य वाक्यानि रचयतु ।**

| | | |
|---|---|---|
| रामायणे | श्रीराम: | भवति |
| दशरथस्य पुत्र: | सीता | |
| रामायणस्य नायिका | लक्ष्मण: | |
| श्रीरामस्य अनुज: | आदिकाव्यम् | |
| रामायणस्य कर्ता | सप्तकाण्डानि | सन्ति |
| रामायणं | वाल्मीकि: | |

उदा - रामायणस्य नायिका सीता भवति ।

### 4. उदाहरणानुसारं कोष्ठके दत्तानां पदानाम् उचितरूपाणि उपयुज्य वाक्यानि पूरयतु ।

उदा - अनिलः **अम्बया** सह पचति ।

राजेशः ............ सह क्रीडति । (मित्रम्)

लता ............ समं नृत्यति । (राधा)

रमेशः ........... समं पुष्पाणि चिनोति । (सोदरी)

बालकः ............. सार्धम् आगच्छति । (मातुलः)

### 5. अधोदत्तानां वाक्यानाम् उदाहरणानुसारं पट्टिकां करोतु ।

वननशीकरणेन जलदौर्लभ्यं सञ्जायते ।

वृक्षपरिपालनम् अस्माकं कर्तव्यं भवति ।

वननशीकरणं परिस्थितेः दोषाय भवति ।

बालवृक्षरोपणम् आवश्यकं भवति ।

वृष्टिजलसम्भरणी न आवश्यकी ।

पलास्तिकवस्तूनां निर्माजनं न करणीयम् ।

प्रकृतिविभवानां सदुपयोगः करणीयः।

वाहनानां मितोपयोगः कर्तव्यः।

| | शुद्धम् | अशुद्धम् |
|---|---|---|
| उदा : - | वाहनानां मितोपयोगः कर्तव्यः। | वृष्टिजलसम्भरणं न आवश्यकम् । |

### 6. चित्रम् उचितवर्णैः लिम्पन्तु ।



## अनुबन्धः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | दृश्यते | दृश्येते | दृश्यन्ते |
| मध्यमपुरुषः | दृश्यसे | दृश्येथे | दृश्यध्वे |
| उत्तमपुरुषः | दृश्ये | दृश्यावहे | दृश्यामहे |

## शब्दकोशः

| पदम् | संस्कृतम् | മലയാളം | English |
|---|---|---|---|
| समः | समतलम् | നിരപ്പായ സ്ഥലം | Flat land |
| पुष्पितः | कुसुमितः | പുഷ്പിച്ച | Flowered |
| तरुः | वृक्षः | വൃക്ഷം | Tree |
| यथावत् | यथायोग्यम् | ഉചിതമായ | Suitable |
| वृतः | आवृतः | മൂടപ്പെട്ട | Covered |
| पद्मिनी | नलिनी | താമരപ്പൊയ്ക | Lotus pond |
| सङ्काशः | समानः | സദൃശം | Similar |
| पद्मं | कमलं | താമര | Lotus |
| गिरिः | नगः | പർവതം | Mountain |
| कन्दरः | गुहा | ഗുഹ | Cave |

वने तटाकं, नदीं च वयं दृष्टवन्तः। सर्वाः नद्यः समुद्रेण मिलन्ति। तथापि समुद्रे अन्यः कश्चन लोकः वर्तते।

### सागरः सागरोपमः ।

## षष्ठः पाठः

# विस्मयकरः समुद्रः



चित्रे किं किम् अस्ति?

महानौका, समुद्रः, जालः .....................

विद्यालयात् विनोदयात्रायै छात्राः समुद्रतीरं गच्छन्ति। तत्र ते स्कूबा डैविंङ् परिशीलकं पश्यन्ति। तेन सह समुद्रविषये चर्चां कुर्वन्ति। इदानीं समुद्रमधिकृत्य एकं पाठं पठामः।



जीवजालस्य आश्रयः, अत्यन्तं विस्मयावहः, अपारः, विविधानां जलजीविनाम् आवासस्थानं च भवति समुद्रः। केचन तीरवासिनः समुद्रात् मत्स्यान् गृहीत्वा विक्रीय स्वजीवनं यापयन्ति। महानौकायां बहवो विनोदसञ्चारिणः जलमार्गेण विविधान् देशान् गच्छन्ति।

विविधवर्णमत्स्याः, तिमिङ्गलादयः भीमाकाराः मीनाः, समुद्रपक्षिणः, विविधानि रत्नानि, युरेनियं, तोरियम् इत्यादीनि मूलकानि च समुद्रे प्रभूतं सन्ति। वस्तुतः सर्वसम्पदः आधारः भवति समुद्रः। विश्वे सप्त समुद्राः विद्यन्ते। कदाचित् प्रकृतिक्षोभेण समुद्रः तीरमतिक्रम्य बहु विनाशं करोति।

मानवाः स्वजीवनाय बहुधा समुद्रमाश्रयन्ति। केचन मानवाः मलिनवस्तूनि नदीषु तथा तटाकेषु च निक्षिपन्ति। अवकरसहितं तज्जलं समुद्रं प्रति प्रवहति। एवं समुद्रोऽपि मालिन्ययुक्तो भवति। अतः तत्परिहाराय समुद्रस्य तथा समुद्रविभवानां च संरक्षणम् अस्माकं कर्तव्यमेव।

## पदच्छेदः

| | | |
|---|---|---|
| समुद्रमधिकृत्य | - | समुद्रम् +अधिकृत्य |
| इत्यादीनि | - | इति +आदीनि |
| तीरमतिक्रम्य | - | तीरम् +अतिक्रम्य |
| समुद्रमाश्रयन्ति | - | समुद्रम् +आश्रयन्ति |
| समुद्रोऽपि | - | समुद्रः+ अपि |
| तज्जलं | - | तत् +जलम् |
| कर्तव्यमेव | - | कर्तव्यम् +एव । |

## विग्रहः

| | |
|---|---|
| तीरवासिनः | तीरे वसति तच्छीलः तीरवासी, ते तीरवासिनः। |
| स्वजीवनं | स्वस्य जीवनं स्वजीवनम्। |
| विनोदसञ्चारिणः | विनोदार्थं सञ्चरति तच्छीलः विनोदसञ्चारी, ते । विनोदसञ्चारिणः। |
| भीमाकारः | भीमः आकारः यस्य सः भीमाकारः । |

## अमरकोशः

मीनः - पृथुरोमा झषो मत्स्यो मीनो वैसारिणोऽण्डजः विसारः शकुली ।

तीरम् - कूलं रोधश्च तीरं च प्रतीरं च तटं त्रिषु।

# पठनप्रवर्तनानि

## 1. उदाहरणानुसारं वाक्यं परिवर्त्य लिखतु।

उदा- .............. पर्णं पतति। (वृक्षः)

वृक्षात् पर्णं पतति।

सायङ्काले पिता ........... आगच्छति। (कार्यालयः)

............... गङ्गा प्रवहति। (हिमालयः)

..............जलं पतति। (मेघः)

............. नादः प्रसरति। (मृदङ्गः)

## 2. उदाहरणानुसारं अक्षराणि क्रमीकृत्य शुद्धं पदं लिखत।

र ती मा सी — तीरसीमा

जी ल ज वी

मु प स क्षी द्र

नो स वि ञ्चा द री

ति प्र ह व

हा का नौ म

## 3. रेखाङ्कितपदानां समानपदं चित्वा वाक्यं पूरयत।

(नौका,तीरे, मीनः)

जले <u>मत्स्यः</u> अस्ति।

जले ......... अस्ति।

सागरे <u>तरणिः</u> अस्ति।

सागरे ..... अस्ति।

सागरस्य <u>तटे</u> कुटीरः अस्ति।

सागरस्य ........ कुटीरः अस्ति।

## 4. पाठभागं पठित्वा प्रश्नानामुचितान्युत्तराणि कोष्ठकात् चित्वा लिखत।

1.विद्यालयात् विनोदयात्रायै छात्राः कुत्र अगच्छन्?

A.नगरम् B.मृगशालाम्

C.समुद्रतीरम् D.नदीतीरम्

2.छात्राः समुद्रतीरे कम् अपश्यन्?

A.स्कूबा डैविंङ् परिशीलकम् B.मोटोर्यानस्य परिशीलकम्

C.सैक्किल्यानस्य परिशीलकम् D.महानौकायाः परिशीलकम्

3.तीरवासिनः समुद्रात् कान् गृहीत्वा स्वजीवनं यापयन्ति?

A.रत्नानि B.लवणानि

C.मत्स्यान् D.सितकानि

4.महानौकायां बहवो विनोदसञ्चारिणः केन मार्गेण विविधान् देशान् गच्छन्ति?

A.जलमार्गेण B.रेयिल् मार्गेण

C.व्योममार्गेण D.भूमार्गेण

5.विश्वे कति समुद्राः सन्ति?

A.पञ्च B.अष्ट

C.नव D.सप्त

### 5. जलसंरक्षणाय के के उपायाः सन्ति? चर्चां कृत्वा लघुटिप्पणीं लिखतु।



### 6. जलसंरक्षणमधिकृत्य भित्तिपत्रिकां रचयतु।



# अनुबन्धः

## अकारान्तः पुल्लिङ्गः समुद्रशब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमा** | समुद्रः | समुद्रौ | समुद्राः |
| **सं.प्रथमा** | हे समुद्र ! | हे समुद्रौ ! | हे समुद्राः ! |
| **द्वितीया** | समुद्रं | समुद्रौ | समुद्रान् |
| **तृतीया** | समुद्रेण | समुद्राभ्यां | समुद्रैः |
| **चतुर्थी** | समुद्राय | समुद्राभ्यां | समुद्रेभ्यः |
| **पञ्चमी** | समुद्रात् | समुद्राभ्यां | समुद्रेभ्यः |
| **षष्ठी** | समुद्रस्य | समुद्रयोः | समुद्राणां |
| **सप्तमी** | समुद्रे | समुद्रयोः | समुद्रेषु ॥ |

# शब्दकोशः

| पदम् | संस्कृतम् | മലയാളം | English |
|---|---|---|---|
| आवासस्थानम् | वासस्थानम् | വാസസ്ഥലം | Residence |
| आश्रयः | अवलम्बः | ആശ്രയം | Support |
| अत्यन्तम् | अत्यधिकम् | വളരെയധികം | Very much |
| अपारः | सीमारहितम् | അതിരില്ലാത്ത | Limitless |
| आधारः | आश्रयः | ആധാരം | Base |
| तादृशम् | तथाविधम् | അപ്രകാരം | Like that |
| गृहीत्वा | स्वीकृत्य | സ്വീകരിച്ചിട്ട് | Having received |
| स्वजीवनम् | स्वस्य जीवनम् | സ്വന്തം ജീവിതം | One's own life |
| मानवाः | मनुष्याः | മനുഷ്യർ | Humans |
| संरक्षणम् | पालनम् | സംരക്ഷണം | Protection |
| प्रभूतं | अत्यधिकं | വളരെയേറെ | Abundantly |